न्यतो विहितमद्यादौ न दोष इत्युक्तम् । कुलाचारशब्दे वक्ष्यमाणस्य कुलाचारधर्म्मस्य प्रायेणेदानीन्तनानां दुष्करत्वेन सुतरां तन्मार्गस्य तन्त्रनिर्दिष्टाधिकारिणामिदानीमसत्त्वात् नैव कर्त्तव्यता । अथ कश्चित् प्राग्भववासनावशादधिकारी सम्पद्यते तथापि कुलचूडामणौ "यत्रासवं तु देयं स्यात् ब्राह्मणस्तु विशेषतः । तत्रार्द्रकरसं दद्यात् ताम्रे वा विसृजेन्मधु । देव्यास्तु दक्षिणे भागे चक्रपार्श्वे निवेदयेत् । मद्यद्रव्यं तु शूद्रस्य नान्येषान्तु कदाचन" । "वैश्यस्य माक्षिकं शुद्धं क्षत्रियस्य तु साज्यकम् । ब्राह्मणस्य गवां क्षीरं ताम्रे वा विसृजेन्मधु । नारिकेलोदकं कांस्ये सर्वेषां चैव शोधनम् इति" च द्विजातीनामासवदाननिषेधेन गौणकल्प एवाधिक्रियते न मुख्यकल्पे । "पीत्वापीत्वा पुनः पीत्वा पतितोधरणीतले । उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते" इति वचनन्तु चतुर्थाश्रमविषयमिति तन्त्रसारः । "निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेध" इत्युक्तेश्चतुर्थाश्रमस्य विधिनिषेधातिक्रान्तत्वेऽपि परमहंसाश्रमस्यैव दोषाभाव इति युक्तमुत्पश्यामः । "वरं प्राणाः प्रगच्छन्तु ब्राह्मणोनार्पयेत् सुराम्" ब्राह्मणो मद्यदानेन ब्राह्मण्यादेव हीयते" बृहत्सङ्गमतन्त्रम् । अतएव कालिका पु० "अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः । नारिकेलोदकं कांस्ये ताम्रे वा विसृजेन्मधु" इत्यनुकल्पो गृहस्थद्विजातिमात्रे विहितः एवं मत्स्यमांसयोर्निषिद्धयोरपि वाममार्गिणां दानादिकं न स्मृतिविरुद्धं "देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाक्" इति मनुना देवार्चनावशिष्टमांसभोजनस्य विधानात् । एतदपि दिव्यभावविषयमिति तन्त्रसारः "मादकं सर्वदा वर्ज्यं मद्यं मांसं सुलोचने ! । ज्ञानेन संस्कृतं तत्तु महापातकनाशनमिति" कुलार्णवोक्तेः । ज्ञानेन सर्वनरेषु आत्मतत्त्वज्ञानेनेत्यर्थः । तदपि न श्रुतिविरुद्धं विश्वनरेषु आत्मदृष्टिमतो वैश्वानरसामोपासकस्य सर्वान्नभक्षणविधानवत् तस्यापि तादृशज्ञानमाहात्म्येन तत्र पापानुत्पत्तिसम्भवात् यथा वैश्वानरसामोपासकं प्रकृत्य "न किञ्चनानन्नं भवति आश्वभ्य आशकुनिभ्य इति" छा० उ० सर्वान्नभोजनं विहितमेवमस्यापि ज्ञानेन पूतत्वान्न तद्भक्षणदोषावहमिति । "कृते श्रुत्युदितोमार्गस्त्रेतायां स्मृतिनोदितः । द्वापरे तु पुराणोक्तः कलावागमसम्मतः" इत्यागमवचनं तु प्रशंसापरम् रागादिबाहुल्येन श्रौतादिधर्मस्य कलावसम्भवदिति तादृशानां तन्त्राधिकारित्वसूचनार्थञ्च "चकार मोहशास्त्राणि केशवः सशिवस्तथा । कापिलं नाकुलं वामं भैरवं पूर्व्वपश्चिमम् । पाञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः, कूर्म्म पु० "शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम् । येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि । प्रथमं हि मयैवोक्तं शैवं पाशुपतादिकम्" पद्मपु० इत्यादिवचनैरागमस्य तामसत्वेन मोहशास्त्रत्वेन निषिद्धत्वेऽपि वेदाविरुद्धांशस्य ग्राह्यतैव । "तथापि योऽंशोमार्गाणां वेदेन न विरुध्यते । सोऽंशः प्रमाणमित्युक्तः केषाञ्चिदधिकारिणाम्" सूतसंहितावचनात् अत्र केषाञ्चिदित्युक्तेः न सर्वेषामधिकारितेति सूचितम् तत्राधिकारिणः शाम्बपु० दर्शिताः । "श्रुतिभ्रष्टः स्मृतिप्रोक्तप्रायश्चित्तपराङ्मुखः । क्रमेण श्रौतसिद्ध्यर्थं ब्राह्मणस्तन्त्रमाश्रयेत्" "पाञ्चरात्रं भागवतं तन्त्रं वैखानसाभिधम् । वेदभ्रष्टान् समुद्दिश्य कमलापतिरुक्तवान्" इति च । ततश्च इदानीन्तनानां विशेषतो गौड़देशवासिनां श्रौतधर्म्माग्निहोत्रादिधर्म्मोच्छेददर्शनेन तत्पापनाशाय प्रायश्चित्तपराङ्मुखतादर्शनेन च श्रौतमार्गभ्रष्टतया क्रमेण श्रौताधिकारस्य प्राप्त्यर्थं तन्त्रोक्तोपासनादिषु वेदाविरुद्धेषु अधिकारः । वेदविरुद्धेषु वाममार्गेषु तु चतुर्थाश्रमस्य तन्त्रोक्ताद्भुताश्रमस्यैवाधिकारः न गृहस्थद्विजानाम् प्रागुक्तैः वचनजातैर्ब्राह्मणादिषु मुख्यमद्यदानसेवनयोर्निषेधात् गृहस्थशूद्रस्य तु मुख्येऽप्यधिकारः द्विजानामनुकल्पाचरणेन तन्मार्गाश्रयणेऽप्यधिकार इतिविवेकः । तल्लक्षणन्तु "सृष्टिश्च प्रलयश्चैव देवानां च तथार्च्चनम् । साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च । षट्कर्म्मसाधनञ्चैव ध्यानयोगश्चतुर्विधः सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदोविदुः" इति आगमभेदाश्च तन्त्रशब्दे वक्ष्यन्ते । अतएव कलिधर्म्मप्रकरणे "एवं क्रियायोगपरैः पुमान् वैदिकतान्त्रिकैः । अर्च्चन्नुभयतः सिद्धिम् मत्तोविन्दत्यभीप्सितम्" भाग० ११स्कन्धे२७अध्याये तान्त्रिकपथेनाप्यर्चनं विहितम् । "अथ सूतकिनः पूजां वक्ष्याम्यागमनोदिताम्" शा० रा० । आगच्छति प्रकृतिप्रत्ययावनुपहत्य उत्पद्यते कर्त्तरि संज्ञायां घ । १२व्याकरणोक्ते प्रकृतिप्रत्ययानुपघातके अट् इट् इत्यादौ शब्दभेदे "आगमादेशयोर्मध्ये बलीयानागमोविधिः" व्याकरणान्तरपरि० "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" । "आगमशास्त्रमनित्यम्" इति च परिभा० । "आगमा आद्युदात्ताः" "आगमा अविद्यमानवद्भवन्तीति" च का० वा०